International Journal of Sanskrit Research 2018; 4(1): 159-161

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 159-161
© 2018 IJSR
www.anantaajournal.com
Received: 01-11-2017
Accepted: 09-12-2017

**डॉ. सीताराम गुर्जर**
सह आचार्य, साहित्य, राजकीय शास्त्री संस्कृत महाविद्यालय, दौसा, राजस्थान, भारत

**Correspondence**
**डॉ. सीताराम गुर्जर**
सह आचार्य, साहित्य, राजकीय शास्त्री संस्कृत महाविद्यालय, दौसा, राजस्थान, भारत

# नैयायिकमते आकाङ्क्षापदार्थविचारः

**डॉ. सीताराम गुर्जर**

**सारांश**
संस्कृतवाङ्गमये शाब्दबौद्धप्रसङ्गे आदौ वाक्यश्रवणानन्तरं पदज्ञानं भवति तदनन्तरं पदार्थस्य । तथा च पदार्थरूपव्यापारानन्तरं शाब्दबौधो सञ्जायते इति सामान्यभिमतम् । किन्तु कदाचित् विषयीकृतानां पदपदार्थज्ञानानां सत्वेऽपि शाब्दबोधो न जायते आकाङ्क्षाभावात् । सा आकाङ्क्षा "यत्पदस्य यत्पदविहरप्रयोज्यशाब्दबोधजनकत्वाभावत्वं तत्पदे तत्पदवत्वज्ञानम्" इत्यनेन लक्षणेनाभिहिता शास्त्रे । आकाङ्क्षेषा आनुपूर्वीविशेषः ।

**मूल शब्दः** संस्कृतवाङ्गमये शाब्दबौद्धप्रसङ्गे, नैयायिकमते, आकाङ्क्षापदार्थविचार

**प्रस्तावना**

लोके हि वाक्यश्रवणानन्तरं शाब्दबोधः अनुभवसिद्धः । यद्यपि वृत्तिज्ञानादीनामभावे सर्वत्र पदसमूहश्रवणानन्तरं लोके बोधः भवतीति वक्तुं न शक्यते, तथापि वृत्तिज्ञानादीनां सत्वे, वाक्ये श्रुते शाब्दबोधः अनुभवसिद्ध एव । एवं हि सिद्धान्तः -

**"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी[1]"।। इति ।**

सर्वप्रथमं हि वाक्ये श्रुते पदज्ञानं ततः पदार्थज्ञानं ततः पदार्थज्ञानरूपव्यापारानन्तरं शाब्दबोधः फलं समुपजायते । परन्तु क्वचित् एतेषु त्रिविधेषु सत्स्वपि शाब्दबोधः न भवति, यथा 'घटः कर्मत्वमानयनं कृतिः' इत्यादौ पदसमूहे। घटमानय इति वाक्यात् ये पदार्थाः उपतिष्ठन्ते, ते एव हि अस्मात् वाक्यादपि उपतिष्ठन्ते । परन्तु घटमानय इति पदसमूहश्रवणानन्तरं यः पुरुषः कम्बुग्रीवादिमत्पदार्थस्य आनयने प्रवर्तते स्म, स इदानीं 'घटः कर्मत्वमानयनं कृतिः' इति वाक्यश्रवणानन्तरं नैव प्रवर्तमानो दृश्यते, अत्रेदं रहस्यं वर्तते यत् तस्य पुरुषस्य एतादृशपदसमूह-श्रवणानन्तरं शाब्दबोधः एव न जातः, तर्हि ज्ञानाभावे इच्छाभावेन प्रवृत्त्यभावः। परन्तु पदज्ञानपदार्थज्ञानानां सत्वेऽपि शाब्दबोधः कुतो न जातः इति प्रश्नोऽत्र जागर्ति, तस्य प्रश्नस्य उत्तरं भवति आकाङ्क्षाभाव एव अत्र कारणम् इति। शाब्दबोधे यथा पदज्ञानादीनां कारणत्वं वर्तते तद्वत् आकाङ्क्षाया अपि कारणत्वं वर्तते, तादृश्या आकाङ्क्षाया अभावादेवात्र शाब्दबोधः न जातः इति। का नाम आकाङ्क्षा इत्यत्र उदयनाचार्यादिभिः दार्शनिकान्तरैश्च बहुधा अस्याः परिचयः प्रदत्तो वर्तते।,

तात्पर्यटीकायामभिहितं वर्तते – “तस्मात् पदानि कृतसंकेतानि स्वार्थान् स्मारयन्ति आकाङ्क्षायोग्यतासत्तिसध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेनुमानात् भवन्ति[2]” । इति । कारिकावल्यामपि अभिहितं वर्तते[3] -

**“यत्पदेन विना यस्याननुभावकता भवेत्।**
**आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्” ।। इति ।**

अस्यार्थः घटमानय इति वाक्यात् यः शाब्दबोधः जायते, सः घटः कर्मत्वमानयनं कृतिः इति वाक्यात् न जायते, अत्र शाब्दबोधस्य अनुभवाभावः यः लोकप्रसिद्धः सः अमादिपदाभावप्रयोज्यः, यदि कर्मत्वमिति पदस्य स्थाने अम्पदं स्यात्तदा शाब्दबोधो भवति स्म, इदानीम् अम्पदाभावात् शाब्दबोधः न भवति इत्यतः शाब्दबोधाभावे अम्पदाभावः प्रयोजकः, एवञ्च अम्पदाभावप्रयोज्यः अत्र शाब्दबोधानुभवाभावः ।

इहेदानीं प्रश्नः यत् आकाङ्क्षा शाब्दबोधे कारणम् इति वक्तुं न शक्यते, तथा सति अकाङ्क्षाभ्रमे सति शाब्दबोधः अनुभवसिद्धः विरुद्ध्येत । कस्यचित् पुरुषस्य घटः कर्मत्वमानयनं कृतिः इति वाक्यादपि शाब्दबोधः भवति चेत् तत् केन वारयितुं शक्यते । एवञ्च तत्र वाक्ये आकाङ्क्षा नास्ति तथापि शाब्दबोधः जायते, अस्यानुभवस्य समर्थनाय अकाङ्क्षाज्ञानं शाब्दबोधे कारणमिति वक्तव्यम्, इदानीं तु वस्तुगत्या आकाङ्क्षाया अभावेऽपि तत्र आकाङ्क्षाज्ञानस्य सत्त्वेन शाब्दबोधः जायते इति वक्तुं शक्यते । परन्तु इदानीम् आकाङ्क्षाज्ञानं नाम ‘यत्पदस्य यत्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभावत्वं तत्पदे तत्पदवत्वज्ञानम्’ । घटमानय इति वाक्ये आकाङ्क्षाज्ञानं नाम घटपदस्य अम्पदविरहप्रयोज्य-शाब्दबोधजनकत्वाभाववत्वं वर्तते इत्यतः घटपदे अम्पदवत्वज्ञानम् आकाङ्क्षाज्ञानम् भवति । परन्तु घटमानय इति वाक्यश्रवणानन्तरं घटपदस्य अम्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभाववत्वज्ञानस्य बिलम्बे कार्ये शाब्दबोधे बिलम्बः प्रतीयेत, तथा तु नैव प्रतीयते, यथा घटस्य निर्माणे दण्डस्य बिलम्बे घटबिलम्बः प्रसिद्धः । तद्वत् आकाङ्क्षाज्ञानस्य शाब्दबोधं प्रति कारणत्वे आकाङ्क्षाज्ञानबिलम्बे शाब्दबोधबिलम्बः प्रतीयेत, तथा तु नैव प्रतीयते एवञ्च कथं कार्यकारणभावः अनयोः वक्तुं शक्यते ? इति ।

अत्र उत्तरं तु इदं भवति यत् सत्यम्, अकाङ्क्षाभ्रमस्थले आकाङ्क्षाभावेऽपि अकाङ्क्षाज्ञानस्य सत्त्वेन शाब्दबोधः निर्वहणीय एव, तथापि आकाङ्क्षाज्ञाने घटकतया यत् अम्पदविरहप्रयोज्यशाब्दबोध-जनकत्वाभावः वर्तते तस्य स्वरूपत एव कारणत्वमङ्गीक्रियते न तु तज्ज्ञानस्य ।

अयं हि आशयः द्विविधो हि कारणत्वव्यवहारो भवति, एकः स्वरूपत एव कारणत्वात् तत्र जायमानः व्यवहारः। यथा दाहं प्रति वह्नेः। अत्र हि वह्निः दाहं जनयति इति ज्ञानं विनापि तस्य स्पर्शे दाहः जायते।अन्यः भवति व्यवहारः ज्ञानपूर्वकः। यथा अनुमितिं प्रति लिङ्गस्य, अत्र हि लिङ्गं न स्वरूपतः कारणमपि तु तस्य ज्ञानमेव कारणम्।यदि हि लिङ्गं स्वरूपत एव कारणं स्यात्तदा अतीतादिलिङ्गस्थले लिङ्गस्य स्वरूपतः कारणस्य अभावेन तेन “इयं यज्ञशाला अतीतवह्निमती अतीतधूमात्” इत्याद्यनुमितयः न स्युः।उक्तमपि-

**“अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि ।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा[4]” ।। इति ॥**

अतः एतादृशस्थले लिङ्गस्य ज्ञानद्वारा एव कारणत्वं वर्तते इति अङ्गीकर्तव्यम् ।। अत्रापि प्रश्नकर्त्रा आकाङ्क्षाघटकस्य यत्पदस्य यत्पदविरहप्रयोज्यशाब्दबोधजनकत्वाभावस्य ज्ञानद्वारा कारणत्वमिति मत्त्वा प्रश्नः कृतः, परन्तु उत्तरं तु आकाङ्क्षाघटकस्य तस्य स्वरूपत एव कारणत्वमङ्गीक्रियते, यथा दाहं प्रति अग्नेः वर्तते। एवञ्च तस्य ज्ञानस्य कारणत्वाकल्पनात् न तज्ज्ञानबिलम्बेन शाब्दबोधबिलम्बापत्तिरूपदोषः।

एवञ्च आकाङ्क्षाज्ञानस्य शाब्दबोधस्य कार्यकारणभावः एवं वक्तव्यः- यथा घटमानय इत्यत्र कर्मत्वविशेष्यकाधेयतासम्बन्धा-वच्छिन्नघटनिष्ठप्रकारता-निरूपकशाब्दबोधत्वावच्छिन्नं प्रति(नाम घटनिष्ठं कर्मत्वम् इति बोधं प्रति) घटपदोत्तराम्पदज्ञानं कारणम् इति ।

अत्र प्रश्नः एवं सति कलशमानय इति वाक्यश्रवणानन्तरमपि पूर्वोक्तस्य कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारता-निरूपकशाब्दबोधस्य जायमानत्वेन तत्र च कारणत्वेन घटपदोत्तराम्पदाभावेन व्यभिचारः इति। अत्र उच्यते तर्हि कारणं परिष्क्रियते, न केवलं घटपदोत्तराम्पदज्ञानं कारणमपि तु घटार्थकपदोत्तराम्पदज्ञानं कारणम् इति। एवञ्च पूर्वोक्तस्थले घटपदोत्तराम्पदस्याभावेऽपि घटार्थककलशपदोत्तराम्पदस्य सत्त्वेन कारणस्यापि सत्त्वात् न व्यभिचारदोषः। इति ।

ननु तथापि घटस्य आनयनम् इति कृदन्तप्रयोगे षष्ठ्याः कर्मत्वार्थकतया घटनिष्ठं कर्मत्वमिति कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारता-निरूपकशाब्दबोधः अत्रापि इष्यते परन्तु अत्र घटार्थपदोत्तराम्पदं नास्ति, अपि तु घटार्थकपदोत्तरङस्पदं वर्तते। एवञ्च कारणाभावेऽपि कार्यस्य सत्त्वेन व्यभिचारः स्यात् इति चेत्, तर्हि कारणे इतोऽपि परिष्कारः क्रियते कर्मत्वविशेष्यकाधेयतासम्बन्धावच्छिन्नघटनिष्ठप्रकारतानिरूपकशाब्दबोधत्वावच्छिन्नं प्रति घटपदार्थकपदोत्तर-कर्मत्वपदार्थकपदज्ञानं कारणमिति । पूर्वोक्तस्थले घटार्थकपदोत्तराम्पदस्याभावेऽपि घटार्थकपदोत्तरकर्मत्वार्थ-कङस्पदस्य सत्वेन कारणस्यापि सत्त्वात् न व्यभिचारः । इति ।

ननु इदानीमपि मौनिश्लोकादीनां आकाङ्क्षादिमत्वं न स्यात् तत्र मौनिना पदानामनुच्चारणेन पदस्य अभावेन पदे पदवत्त्वरूपाकाङ्क्षाया वक्तुमशक्यत्वा-दिति चेत्, तन्न आकाङ्क्षालक्षणे पदपदस्य पदज्ञानपरत्वेनादोषात्। मौनिश्लोकादौ पदस्याभावेऽपि पदज्ञानं तु सम्भवति इत्यतः न तेषु आकाङ्क्षाभावापत्तिरूपदोषापत्तिः । पदज्ञानं तु तत्र लिप्यादिना अनुमितमिति अनुमित्यात्मकं ग्राह्यम् ।

ननु एवमपि 'अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्यताम्' इत्यादिप्रयोगस्थले शाब्दबोधाभावदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनापि आकाङ्क्षायाः सत्त्वेन 'राज्ञः पुरुषः' इति शाब्दबोधापत्तिः इति चेत् तन्न, यतो हि न केवलमाकाङ्क्षाज्ञानमात्रं शाब्दबोधकारणम्, योग्यताज्ञानादीनामपि शाब्दबोधे कारणत्वस्याङ्गीकारेण तत्र तात्पर्यज्ञानस्यापि प्रवेशेन अत्र राज्ञः पुरुषपदार्थेनान्वये तात्पर्यस्याभावेन राज्ञः पुरुषः इति शाब्दबोधापत्तिरूपदूषणस्य असत्त्वात् ।

मूर्धन्यप्रामाणिकनैयायिकाः गदाधरभट्टाचार्याः अपि स्वग्रन्थे आकाङ्क्षाज्ञानस्य कारणत्वमङ्गीकृतवन्तः । ते हि स्वग्रन्थे व्युत्पत्तिवादे शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति अभिधाय पुनः एक पदार्थ विशेष्यकापरपदार्थप्रकारककिञ्चित्संसर्गक-शाब्दबुद्धित्वावच्छिन्नं प्रति तत्तत्पदसमभिव्याहाररूपाकाङ्क्षाज्ञानं कारणमितिअभिहितवन्तः । इदं तु सामान्यतः आकाङ्क्षायाः शाब्दबोधे कार्यकारणभावः । ततः परं विशेषेण कार्यकारणभावा अपि तैः सूचिताः ।

एवं हि आशयः यत् न केवलं घटमानय इत्यादाविव घटपदे अम्पदवत्त्वम् इति रूपेण प्रकृतिप्रत्यययोरेव आकाङ्क्षा भवति, अपि तु अन्यत्रापि आकाङ्क्षा सम्भवति - यथा अभेदसंसर्गकनीलादि-प्रकारकघटादिविशेष्यकशाब्दबोधे नीलादिपदाव्यवहितोत्तरघटादि-पवत्त्वम्, नीलादिघटादिपदयोः समानविभक्ति-कत्वम् वा च आकाङ्क्षा । तथैव कर्तृत्वकर्मत्वाद्यर्थकषष्ठ्या शाब्दबोधजनने कृदन्तपदसमभि-व्याहारोऽपि आकाङ्क्षा। एवमाख्यातेन भावकर्मत्वयोर्विवक्षायां यगात्मनेपदसमभिव्याहारोऽप्याकाङ्क्षा । अत एव हि भट्टाचार्यैः आकाङ्क्षाविषये अभिहितम् – "स च क्वचिदभेदः, क्वचिच्च तदतिरिक्त एव आधारधेयभावप्रतियोग्यनुयोगिभावविषयविषयिभावादिः[5] "। इति ।

महादेवपण्डिताः अपि का नामाकाङ्क्षा इति प्रश्ने निष्कृष्टमुत्तरं ददुः- आकाङ्क्षा नाम आनुपूर्वीविशेषः । आनुपूर्वी नाम पुनः पदानां पूर्वापरीभावः । तथा च यादृशयादृशानुपूर्वीतः यादृशान्वयबोधः भवति, तत्र तादृशानुपूर्वीज्ञानं कारणमिति आकाङ्क्षाज्ञानं कारणमित्यस्यार्थः ।

## References


1. कारिकावली.का.सं-८१॥
2. न्यायवार्तिकतात्पर्यटीका.१.१.७, पृ-३७२॥
3. कारिकावली.का.सं-८४॥
4. कारिकावली.का.सं-६७॥
5. व्युत्पत्तिवादः.पृ.१॥